क्वचित्तु कपिला भस्मगर्भा चागुरुशिंशपा ।
पिच्छिला शिंशपा युग्मपत्रिकागुरु चेत्यपि ॥”
इति शब्दरत्नावली ॥

अस्या गुणाः । “शिंशपा वातनाशिनी ।” इति राजवल्लभः ॥ अपि च ।

“शिंशपा कटुका तिक्ता कषाया शोषकारिणी ।
उष्णवीर्य्या हरेन्मेदः कुष्ठश्वित्रवमिक्रमीन् ।
वस्तिरुग्व्रणदाहास्रबलासागर्भपातिनी ॥”
इति भावप्रकाशः ॥

(तत्काष्ठनिर्म्मितरथस्तु दृढो भवति । यथा, ऋग्वेदे । ३ । ५३ । १९ ।

“अभिव्ययस्व खदिरस्य सार-
मोजो धेहि स्पन्दने शिंशपायाम् ।”

स्पन्दने रथस्य गमने सति शिंशपायां शिंशपाख्यदारुनिर्म्मिते रथस्य फलके ओजो धेहि दार्ढ्यं कुरु ।” इति तद्भाष्ये सायणः ॥)

शिक्, [च्] स्त्री, शिक्यम् । इति शब्दरत्नावली ॥

शक्रुः, त्रि, अध्यवसायी । इति त्रिकाण्डशेषः ॥

शिक्थं, क्ली, मधुजातद्रव्यविशेषः । मोम् इति भाषा । तत्पर्य्यायः । शिक्थकम् २ मधुजम् ३ विघसम् ४ मधुसम्भवम् ५ मोदनम् ६ काचम् ७ उच्छिष्टमोदनम् ८ मक्षिकामलम् ९ क्षौद्रेयम् १० पीतरागम् ११ स्निग्धम् १२ माक्षिकजम् १३ क्षौद्रजम् १४ मधुशेषम् १५ द्रावकम् १६ माक्षिकाश्रयम् १७ मधूत्थितम् १८ मधूत्थम् १९ । अस्य गुणाः । पिच्छिलत्वम् । स्वादुत्वम् । कुष्ठवातास्रनाशित्वम् । मृदुत्वम् । कटुत्वम् । स्निग्धत्वम् । लेपेन स्फुटिताङ्गविलोपनत्वञ्च । इति राजनिर्घण्टः ॥

शिक्थकं, क्ली, (शिक्थ + स्वार्थे कन् ।) शिक्थम् । इति राजनिर्घण्टः ॥

शिक्यं, क्ली, (संस + “संसेः शि क्रुट् किच ।” उणा० ५ । १६ । इति यत् । स च कित् । कुडागमः शिरादेशश्च ।) द्रव्यरक्षार्थरज्जुमयाधारविशेषः । शिका इति भाषा । तत्पर्य्यायः । काचः २ शिक्या ३ शिक् ४ । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । ८ । ३० ।

“हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यै-
श्छिद्रं ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु तद्वित् ॥”)

शिक्या, स्त्री, (शिक्य + स्त्रियां टाप् ।) शिक्यम् । इति शब्दरत्नावली ॥

शिक्यितं, त्रि, (शिक्ये स्थापितमित्यर्थे प्रातिपदिकात् धात्वर्थे इति णिच् ततः क्तः ।) शिक्यस्थापितवस्तु । तत्पर्य्यायः । काचितः २ । इत्यमरः ॥

शिक्ष, ङ शिक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ह्रस्वी । ङ, शिक्षते । शिक्षणं विद्याग्रहणम् । अशिक्षतास्त्रं पितुरेव मन्त्रविदिति रघुः । इति दुर्गादासः ॥

शिक्षणं, क्ली, (शिक्ष + ल्युट् ।) विद्योपादानम् । इति शिक्षाशब्दटीकायां भरतः ॥

शिक्षा, स्त्री, (शिक्ष + “गुरोश्च हलः ।” ३।३।१०३। इत्यः । ततष्टाप् ।) शिक्षणम् । श्योनाकवृक्षः । इति शब्दमाला ॥ वेदाङ्गशास्त्रविशेषः । इत्यमरः ॥ यथा,—

“शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः ।
छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते ॥”
इति ।

तत्र अकारादिवर्णानां स्थलकरणप्रयत्नबोधिका अ-कु-ह-विसर्जनीयाः कण्ठ्या इत्यादिका शिक्षा । इति तट्टीकायां भरतः ॥ * ॥ * ॥

अथ शिक्षाशास्त्रं लिख्यते ।

“अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा ।
शास्त्रानुपूर्व्वं तद्विद्याद्यथोक्तं लोकवेदयोः ॥
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च ×क ⌓पौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयः ऌकारः प्लुत एव च ॥
आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातःसवनयोगन्तं छन्दो गायत्रमाश्रितम् ॥
कण्ठे माध्यन्दिनयुतं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्त्तीयसवनं शीर्षण्यं जागतानुगम् ॥
सोदीर्णो मूर्द्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥
उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च ॥
ओभावश्च विवृत्तिश्च श-ष-सा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥
यद्योभावप्रसन्धानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥
हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् ।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥
कण्ठ्यावहा वि-चु-य-शास्तालव्या ओष्ठजावुपू ।
स्युर्मूर्द्धन्या ऋ-टु-र-षा दन्त्या ऌ-तु-ल-साः स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः ।
ए ऐ तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ ॥
अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् ।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥
संवृतं मात्रिकं ज्ञेयं विवृतन्तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्व्वे अघोषा विवृताः स्मृताः ॥
स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥
अनुस्वारयमानाञ्च नासिकास्थानमुच्यते ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वरानु ।
अनुस्वारस्तु कर्त्तव्यो नित्यं ह्रोः श-ष-सेषु च ॥
अनुस्वारे विवृत्यान्तु विरामे चाक्षरद्वये ।
द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः ॥
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥
यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते ।
एवं रङ्गाः प्रयोक्तव्याः खे अ-राँ इव खेदया ॥
रङ्गवर्णं प्रयुञ्जीरन् नो ग्रसेत् पूर्व्वमक्षरम् ।
दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत् ॥
हृदये चैकमात्रः स्यादर्द्धमात्रस्तु मूर्द्धनि ।
नासिकायां तथार्द्धञ्च रङ्गस्यैवं द्विमात्रता ॥
हृदयादुत्करे तिष्ठन् कांस्येन समनुस्वरम् ।
मार्दवञ्च द्विमात्रञ्च जघन्वाँ इति निदर्शनम् ॥
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ तथा ।
स रङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडयेत् ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥
माधुर्य्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्य्यं लयसमर्थञ्च षडेते पाठका गुणाः ॥
शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसि गतं तथा स्थानविवर्ज्जितम् ॥

उपांशुदष्टं त्वरितं निरस्तं
विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरञ्च
वदेन्न दीनं न तु सानुनास्यम् ॥
प्रातः पठेन्नित्यमुरःस्थितेन
स्वरेण शार्दूलरुतोपमेन ।
मध्यं दिने कण्ठगतेन चैव
चक्राह्वसंकूजितसन्निभेन ॥
तारन्तु विद्यात् सवनं तृतीयं
शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वराणां
तुल्येन नादेन शिरःस्थितेन ॥

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः श-रस्तथा ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥
यमोऽनुनासिका न ह्रौ नादिनो ह-झषः स्मृताः ।
ईषन्नादा यणो जश्च श्वासिनश्च खफादयः ॥
ईषच्छ्वासांश्चरो विद्यात् गोर्द्धामैतत् प्रचक्षते ।
दाक्षीपुत्त्रः पाणिनिना येनेदं व्यापितं भुवि ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।